संस्कृतस्वाध्यायः

## २०. बाल्यकालस्मरणम्

स्म

विजयः - विनय ! सप्ताहात् पूर्वं परीक्षिताचार्यः स्वर्गस्थः इति वार्ता ।

विनयः - एवं वा ? बहु वृद्धः आसीत् सः । बहु शास्त्राणि जानाति स्म । सम्यक् पाठयति स्म आचार्यः ।

विजयः - किन्तु भवान् तु न पठति स्म ।

विनयः - तदा तु बाल्ये वयं विद्यालयं न गच्छामः स्म । त्वमपि आम्रफलं खादसि स्म सदा । मम मित्राणि अपि अटन्ति स्म ।

विजयः - सत्यम् । मम गृहे अपि भगिन्यौ अम्बां वदतः स्म । माता तर्जयति स्म । पिता तु कोपेन ताडयति स्म ।

विनयः - किन्तु मम गृहे बहु न तर्जयन्ति स्म । अहं तु रात्रौ पठामि स्म । प्रथमां श्रेणीं प्राप्नोमि स्म ।

विजयः - विनय ! ते प्रियङ्का मालविका च सदा कलहं कुरुतः स्म । स्मरति वा ? बहु विनोदः भवति स्म ।

विनयः - एवम्, आवां ते द्वे अपि पीडयावः स्म । ते द्वे रोदनं कुरुतः स्म ।

विजयः - भोः इदानीं पठावः, श्वः एव परीक्षा । बाल्यकालस्य दिनानि अतिमधुराणि । सर्वदा स्मरणयोग्यानि ।

---